# Shri Mahalasa Sahasranamavali Stotram

# श्रीमहालसा सहस्रनामस्तोत्रम्

## Document Information

Text title : Mahalasa Sahasranamavali

File name : mahAlasAsahasranAmAvaliH.itx

Category : devii, sahasranAmAvalI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : See corresponding stotram

Latest update : March 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# श्रीमहालसा सहस्रनामस्तोत्रम्

श्रीगणेशाय नमः । श्रीमहालसायै नमः ।
ब्रह्मा उवाच -
नाम्नां सहस्रैर्जननीं सृष्टिज्ञानप्रदां पराम् ।
तद्गोप्यमति ते पुत्र कथये शृणु नारद ॥ १॥

विष्णुमूर्तिरजा देवी मोहिनी श्री महालसा ।
सर्वदेवमयी माता त्रिगुणा परमेश्वरी ॥ २॥

तस्या नाम्नां सहस्रं ते दिव्यं वच्मि शृणुष्व तत् ।
पुष्टिदं तुष्टिदं भुक्तिमुक्तिदं मोहनाशनम् ॥ ३॥

मातृकाक्रमसाहस्रं सर्वनामामृतं शुभम् ।
भक्तियुक्तः शुचिर्भूत्वा जपेत् श्रीमूर्तिसन्निधौ ॥ ४॥

हृदि ध्यात्वाऽधिदेवं च विष्णुमेतज्जपेन्मनुम् ।
चिच्छक्तिधर्मकामार्थमोक्षेषु विनियोज्यते ॥ ५॥

अस्य श्री महालसासहस्रनाममन्त्रस्य शिवऋषिः ।
श्रीविष्णुमूर्तिमोहिनी श्रीमहालसा देवता । अनुष्टुप् छन्दः ।
ह्रीं बीजम् । क्लीं शक्तिः । सर्वज्ञा सर्वशक्तिश्चेति कीलकम् ।
चिच्छक्तिधर्मकामार्थमोक्षप्राप्त्यर्थं श्रीमहालसाप्रीत्यर्थे जपे विनियोगः ॥

अथ ध्यानं -
अरुणामतिपीतवाससां धृतकार्तस्वरचारुभूषणां
अतिरम्यवपुश्चतुर्भुजामनिशं नौमि महालसां शुभाम् ।
उद्यद्भानुसहस्रदीप्तिवपुषां जाम्बूनदालङ्कृतां
ब्रह्मेन्द्रादिसुरैः स्वमौलिमणिभिर्नीराजितश्रीपदाम् ॥

भक्ताभीष्टफलप्रदां च दधतीं हस्तैश्च कौक्षेयक- ।
शूलामित्रशिरांसि राहुमथिनीं ध्यायेत्सदा मोहिनीम् ॥

इति ध्यानं-

ॐ महालसायै नमः ॥

अथ नामावलिः ।
ॐ ओङ्काररूपायै नमः । नम्यायै । नयनानन्ददायिन्यै । नित्यायै ।
नतिप्रियायै । नन्दायै । महादेव्यै । महेश्वर्यै । महालसायै ।
विष्णुशक्त्यै । महामायायै । महालयायै । सिद्ध्यै । धियै ।
अमृतायै । नन्दायै । आनन्दायै । आकूत्यै । अनिन्दितायै । आढ्यायै नमः । २०

ॐ आर्यायै नमः । अभयायै । अशक्यायै । अजयायै । अजेयायै ।
अमलायै । अमरायै । अमूर्त्यै । अदित्यै । आर्यायै । आदित्यमात्रे ।
अगुणायै । अवन्यै । आनन्दिन्यै । असुरघ्ने । अर्च्यै । रूपवत्यै ।
अमृतप्रसुवे । आकाररूपायै । अयोध्यायै नमः । ४०

ॐ असुरच्छिदे नमः । अमरवल्लभायै । अखण्डितायुषे । अनघायै ।
अलिराज्यै । अहस्करायै । आमयघ्न्यै । अलकायै । अनेकायै । अहल्यायै ।
अभीत्यै । अक्षयायै । अन्नपूर्णायै । अनसूयायै । अग्र्यायै ।
अशुभघ्न्यै । अजवन्दितायै । आद्यायै । अभयप्रदायै । अरूपायै नमः । ६०

ॐ अजरायै नमः । अमलविग्रहायै । आराध्यायै । आशापुर्यै ।
आर्तिनाशिन्यै । अमरवन्दितायै । अनाकारायै । अतुलायै । अभीष्टायै ।
अशेषायै । अभीप्सितप्रदायै । अप्रमेयायै । अरुणायै । अलक्ष्यायै ।
अद्वैतायै । अमूर्तायै । अच्युतायै । आकृत्यै । अष्टसिद्धिप्रदायै ।
अनर्घ्यकौस्तुभायै नमः । ८०

ॐ मुक्तकन्धरायै नमः । अनन्तशक्त्यै । अज्ञेयायै । अणुरूपायै ।
अरुणाकृत्यै । अवाच्यायै । अनन्तरूपायै । अपूर्वायै । अनादये ।
आदये । ईश्वर्यै । इष्टेष्टदायै । इन्द्राण्यै । ईशायै । ईशान्यै ।
इन्द्रमोहिन्यै । इलायै । ईशानमदघ्न्यै । ईशानवरदायै । इन्दिरायै नमः । १००

ॐ इच्छायै नमः । ईषत्फुल्लकमललोचनायै । इन्दीवरप्रदायै ।
इडायै । इभास्यनुतायै । ईशानप्रियायै । इन्दुनिभाननायै । इडायै ।
इन्द्रादिस्तुतायै । इन्द्राणीवरदायै । ईड्यायै । इन्दिरायै । ईश्वर्यै ।
उत्तमायै । उत्कृष्टवर्णायै । उर्व्यै । उमायै । उर्वश्यै ।
उदयप्रभायै । ऊतये नमः । १२०

ॐ उद्यद्भानुकोटिप्रभायै नमः । उभयतोमुख्यै । उरगेन्द्रशयायै ।
उत्केल्यै । उरुशक्त्यै । उरुप्रदायै । ऊर्ध्वकेश्यै । उरुदेहायै ।
उष्ठोद्धृतवसुन्धरायै । ऊर्णावासायै । उन्नताकाररूपायै ।
उन्नद्धमदापहायै । ऋतुपर्णार्चितायै । ऋद्ध्यै । ऋतुपुष्पायै ।
ऌकारिकायै । एकैश्वर्यप्रदायै । ऐन्द्ध्यै । ऐन्दव्यै ।
ओङ्कारसंस्थितायै नमः । १४०

ॐ ओषध्यन्नप्रदात्र्यै नमः । औषध्यै । और्ववन्दितायै ।
अन्तर्वर्त्यै । अम्बिकायै । अम्बालिकायै । अम्बुधिशयायै । अम्बुध्यै ।
अन्तकघ्न्यै । अन्तकर्त्र्यै । अन्तिमायै । अन्तकरूपिण्यै । अम्बुदायै ।
अम्बरसंस्थाङ्कायै । अशेषस्वरभूषितायै । काम्यायै । कामप्रदायै ।
कृष्णायै । कल्याण्यै । कल्पकारिण्यै नमः । १६०

ॐ काल्यै नमः । कलायै । कलिहरायै । काश्यै । कलिमलापहायै ।
कम्बुग्रीवायै । कलाकेल्यै । कमलाक्ष्यै । कलानिध्यै । कावेर्यै ।
कुलकान्तायै । कौमार्यै । कालिकायै । कथायै । केतक्यै । कुलजायै ।
कन्यायै । कलकण्ठ्यै । कवित्वदायै । कामबीजवत्यै नमः । १८०

ॐ कान्त्यै नमः । कोट्यै । केल्यै । कुह्वै । कृत्यै । कमलायै ।
कलभोरवे । कामाक्ष्यै । कमनीयभ्रुवे । कलङ्करहितायै । कान्तायै ।
कुशलायै । कुटिलालकायै । काष्ठायै । कलायै । कुरुक्षेत्रभूम्यै ।
कलितदानवायै । कुल्यायै । कलावत्यै । कीर्त्यै नमः । २००

ॐ केशिघ्न्यै नमः । कीर्तिदायिन्यै । कविप्रीतायै । करुणायै ।
कृपायै । काश्मीरवासिन्यै । कादम्बर्यै । कलरवायै ।
कुचमण्डलमण्डितायै । कौशिक्यै । कृतमालायै । कौशाम्ब्यै ।
कोशवर्धिन्यै । कुशावर्तायै । कामधेनवे । कपिलायै । कुलोद्भवायै ।
कुङ्कुमाङ्कितदेहायै । कुमार्यै । कुङ्कुमारुणायै नमः । २२०

ॐ काशपुष्पप्रतीकाशायै नमः । कालमार्यै । कालिकायै । किरणायै ।
कल्पलतिकायै । कल्पसङ्ख्यायै । कुमुद्वत्यै । काश्यप्यै । कुतुकायै ।
कुध्रायै । कृशाङ्ग्यै । कायवर्जितायै । कामिन्यै । कुन्तहस्तायै ।
कुलविद्यायै । कौलिक्यै । काव्यशक्त्यै । केलिपरायै । कलहायै ।
कान्तिलोचनायै नमः । २४०

ॐ काञ्च्यै नमः । कनकधारायै । कलये । कनककुण्डलायै ।

कमलस्त्रग्धरायै । कामवरदायै । कमलाकृत्यै ।
काञ्चीकलापरम्यायै । कमलासनसंस्तुतायै । कम्बीजायै ।
कौत्सवरदायै । कामरूपनिवासिन्यै । खड्गिन्यै । खड्गहस्तायै ।
खट्वाङ्गवरधारिण्यै । खेटहस्तायै । खड्गधरायै । खन्यै ।
खस्थायै । खलापहायै नमः । २६०

ॐ खगमात्रे नमः । खगाख्यात्यै । खगेन्द्रवरवाहनायै ।
खुराभिघातसैन्यघ्न्यै । खेचर्यै । खेटकामदायै ।
खरदूषणहन्त्र्यै । खरस्पर्शायै । खरूपिण्यै । गीतायै ।
गीतप्रियायै । गीतिर्गायत्र्यै । गौतमीगुरवे । गुणाध्यक्षायै ।
गुणवत्यै । गोपीचन्दनचर्चितायै । गङ्गायै । गोघ्न्यै । गुणाढ्यायै ।
गवे नमः । २८०

ॐ गणेशायै नमः । गिरे । गोपिकायै । गोवर्धनधरायै । गुर्व्यै ।
गोकुलाभयदायिन्यै । गण्डक्यै । गौतम्यै । गाथायै । गयायै । गौर्यै ।
गणेशसुवे । गोदावर्यै । गोस्वरूपायै । गौतमाख्यमुनिस्तुतायै ।
गानप्रियायै । गम्भीरायै । गेयायै । गन्धर्वसेवितायै । गान्धर्व्यै नमः । ३००

ॐ गीतकीर्त्यै नमः । गेयविद्याविशारदायै । गम्भीरनाभ्यै । गरिमायै ।
गुणरूपायै । गुणोद्धतायै । गोपालरूपिण्यै । गोष्ठ्यै । गहनायै ।
गोधनप्रदायै । गन्धप्रियायै । गोपसख्यै । गारुड्यै । गोहितायै ।
गत्यै । गोप्यायै । गुरुतमायै । गम्यायै । गोदायै । गुरुसुतप्रदायै नमः । ३२०

ॐ घण्टानादप्रियायै नमः । घोरायै । घोरदैत्यविनाशिन्यै ।
घण्टायै । घोरवपुषे । धृष्टदैत्यवक्षस्थलायै । घृणये ।
घटस्तन्यै । घण्टिकायै । घटोघ्न्यै । घटजन्मसुवे ।
घोषायै । घृताहुतये । घासायै । घोरघर्घरनादिन्यै ।
ङकाराकृतिसंविष्टायै । चतुष्कोणसबिन्दुकायै । चारवे ।
चन्द्रप्रभायै । चञ्चवे नमः । ३४०

ॐ चतुराश्रमपूजितायै नमः । चतुर्वेदमय्यै । चित्त्यै ।
चित्स्वरूपायै । चराचरायै । चित्रिण्यै । चक्रिण्यै । चित्रायै ।
चित्राभरणभूषितायै । चाणूरमर्दिन्यै । चण्डायै । चण्डहन्त्र्यै ।
चण्डिकायै । चिदात्मिकायै । चतुर्वर्गफलदायै । चतुराकृत्यै ।
चकोराक्ष्यै । चारुहासायै । चमर्यै । चतुराननायै नमः । ३६०

ॐ चतुःषष्टिःश्रीसुतन्त्रपूजनीयायै नमः । चित्सुखायै ।
चिन्त्यायै । चक्षवे । चन्द्रभागायै । चपलायै । चलकुण्डलायै ।
चतुःषष्टिकलाज्ञानदायिन्यै । चाक्षुष्यै । मनवे । चर्मण्वत्यै ।
चन्द्रिकायै । चन्द्रमात्रे । चापिन्यै । छत्रछायायै । छत्रवत्यै ।
छात्रबुद्धिप्रदायै । छव्यै । छायाग्रहहरायै । छायायै नमः । ३८०

ॐ छद्मदैत्यविनाशिन्यै नमः । जयायै । जयन्त्यै । जयदायै ।
जगत्त्रयहितैषिण्यै । जातरूपमय्यै । ज्योत्स्नायै । जनतायै ।
जातवत्सलायै । जगत्यै । जङ्गमायै । ज्येष्ठायै । जन्मदायै ।
ज्वलितद्युत्यै । जगज्जीवायै । जगद्वन्द्यायै । जरामृत्युविनाशिन्यै ।
जैत्र्यै । जीमूतसङ्काशायै । जीवनायै नमः । ४००

ॐ जीवनप्रदायै नमः । जितश्वासायै । जितारातये । जनित्र्यै ।
जनमोहिन्यै । जलमूर्त्यै । जगद्बीजायै । जनन्यै । जन्मनाशिन्यै ।
जगद्धात्र्यै । जितेन्द्रायै । ज्योतिषे । जायायै । जनेष्टदायै ।
जीर्णायै । जनमात्रे । जन्यायै । जनकनन्दिन्यै । जालन्धरहरायै ।
जात्यै नमः । ४२०

ॐ जनलोकनिवासिन्यै नमः । जयायै । अजय्यायै । जयकर्यै ।
जरायवे । जवनायै । जव्यै । जाम्बूनदविभूषायै । ज्वालायै ।
जम्भवधोद्यतायै । झल्लर्यै । झङ्कृत्यै । झम्पायै ।
झणझ्झणितनूपुरायै । झङ्काररूपायै । झटितिवरदायै ।
झर्झर्यै । झर्यै । ङ्काराकृत्यै । संव्यक्त्यै नमः । ४४०

ॐ कर्णिकाकुसुमाक्षरायै नमः । टङ्कहस्तायै । टङ्कृत्यै । टीकायै ।
टङ्कारभीषणायै । ठरूपायै । ठाकृत्यै । डिम्भायै । डामर्यै ।
डमरुप्रियायै । ढौकिताशेषपातालायै । ढुण्ढिपूज्यायै । ढरूपिण्यै ।
णकाराकृत्यै । अनुस्यूतेभदन्ताक्षमालिन्यै । ताम्रपर्ण्यै ।
तीर्थमय्यै । तापस्यै । तापसप्रियायै । त्रैलोक्यपूजितायै नमः । ४६०

ॐ तारायै नमः । त्रिपदायै । तोमरायै । त्रुट्यै । तन्तवे ।
त्रयीतनवे । ताप्यै । त्रिपथायै । त्र्यम्बकस्तुतायै । तुलायै ।
तामरसाभास्यायै । त्रिलोकस्थायै । त्रिविक्रमायै । तमालदलरुचे ।
तन्व्यै । तरुण्यै । तामस्यै । तर्यै । तत्त्वतुष्टायै । तत्त्वरूपायै नमः । ४८०

ॐ तमोहन्त्र्यै नमः । त्रिशक्तिधृचे । तपस्विन्यै । तपोयुक्तायै ।

तपस्विकुलवन्दितायै । तापापहन्त्र्यै । तार्क्ष्यमात्रे । तृप्त्यै ।
त्रपायै । तृषायै । तपःसिद्ध्यै । तपोनिष्ठायै । तृप्तायै ।
तापितदानवायै । थाथाथैथैथरीथारतालविद्याविशारदायै । दयायै ।
दयानिधये । दुःखहन्त्र्यै । दान्तायै । द्रुतेष्टदायै नमः । ५००

ॐ दात्र्यै नमः । दीनार्तिशमन्यै । दैत्यदर्पविनाशिन्यै । द्वारकायै ।
दरपाणये । दृशे । दिव्यायै । दिग्दमितेन्द्रियायै । दक्षायै ।
दक्षिणायै । दीक्षायै । दीक्षितायै । दक्षपूजितायै । दीर्घकेश्यै ।
दीर्घनिद्रायै । दयालवे । दनुजापहायै । दारिद्र्यनाशिन्यै । द्यावे ।
दिङ्मण्डलविकासितायै नमः । ५२०

ॐ द्रौपद्यै नमः । देवमात्रे । दुर्धर्षायै । दीधितिप्रदायै ।
दशाननहरायै । दोलायै । द्युतये । दीप्तायै । दितये । दनवे ।
दिवागतये । दर्पहरायै । दीप्तपावकलोचनायै । दिव्यसौख्यप्रदायै ।
दीप्त्यै । दिक्पालवरदायै । दशायै । दावाग्निनाशिन्यै । दूत्यै ।
देवदुःखविनाशिन्यै नमः । ५४०

ॐ धर्मदायै नमः । धनदायै । धारायै । धराधरायै ।
धनुर्धरायै । धेनुकायै । ध्वजिन्यै । धीरायै । धूल्यै ।
ध्वान्तहरायै । ध्वन्यै । ध्येयायै । ध्यानायै । ध्यानशीलायै ।
धूतपापायै । धुरन्धरायै । धृत्यै । ध्रुवे । धार्मिक्यै ।
धुर्यायै नमः । ५६०

ॐ धनधान्यविवर्धिन्यै नमः । धर्मिष्ठायै । धर्मफलदायै ।
ध्यानगम्यायै । धारणायै । धरण्यै । धवलायै । नीत्यै ।
निष्ठायै । नाकगतिप्रदायै । नागरूपायै । नागवल्ल्यै । नीलायै ।
नागेन्द्रपूजितायै । नारसिंह्यै । नद्यै । नन्दायै । नन्द्यावर्तप्रियायै ।
निधये । निधिपुरस्थायै नमः । ५८०

ॐ न्यायसुवे नमः । न्यायकोविदायै । नाभिस्तुतायै । नयवत्यै ।
नरकार्तिहर्यै । नाभये । नासायै । नूतनाङ्गायै । नरकघ्न्यै ।
नुत्यै । नागपाशधरायै । नित्यायै । नानामङ्गलदायिन्यै । नार्यै ।
नारायण्यै । नौकायै । नीलमेघसमप्रभायै । नट्यै । नीलाम्बरायै ।
नक्रपोथिन्यै नमः । ६००

ॐ नलिन्यै नमः । नत्यै । निशुम्भघ्न्यै । नर्मदायै ।

नक्षत्राख्यायै । नन्दिन्यै । पद्मिन्यै । पद्मकोशाक्ष्यै ।
पुण्डलीकवरप्रदायै । पुराणपरमायै । प्रीत्यै । प्रेष्ठायै ।
पीताम्बरायै । परायै । पुण्यायै । प्रज्ञायै । पयोष्ण्यै । पम्पायै ।
पद्मायै । पयस्विन्यै नमः । ६२०

ॐ पीवरायै नमः । पुरुषायै । पुष्ट्यै । परमात्मस्वरूपिण्यै ।
पापघ्न्यै । प्रियकर्त्र्यै । पवित्रायै । परमेश्वर्यै । पुत्रिण्यै ।
परमानन्दायै । पद्महस्तायै । पिकस्वरायै । पुरुषार्थप्रदायै ।
प्रौढायै । प्राप्त्यै । पर्वतनन्दिन्यै । पतिव्रतायै । पतिमय्यै ।
प्रियायै । प्रीतिमञ्जर्यै नमः । ६४०

ॐ पातालवासिन्यै नमः । पूर्त्यै । पाञ्चाल्यै । प्राणिनां प्रसुवे ।
पराशक्त्यै । पाशहस्तायै । प्रसिद्धायै । पद्मजार्चितायै ।
प्रवरातीरसंस्थायै । पुत्रपौत्रप्रदायिन्यै । पितामह्यै ।
पितृमात्रे । प्राच्यै । पूर्णायै । परात्मिकायै । परापवादसंहन्त्र्यै ।
पतगेन्द्रकृतासनायै । पतगेन्द्रशयायै । पाकहन्त्र्यै ।
परशुप्रियायै नमः । ६६०

ॐ फणिमात्रे नमः । फलदायै । फलभुजे । फेनदैत्यहृते ।
फुल्लाम्बुजासनायै । फुल्लायै । फुल्लपद्मकरायै । बल्यै । बलिदायै ।
बालिकायै । बालायै । बदर्यै । बलशालिन्यै । बलभद्रप्रियायै ।
बुद्ध्यै । बाहुदायै । बलिसंस्तुतायै । बालेन्दुशिखरायै । बन्द्यै ।
बालग्रहविनाशिन्यै नमः । ६८०

ॐ ब्राह्म्यै नमः । बृहत्तमायै । बाणायै । ब्रह्माण्यै ।
ब्रह्मणस्पत्यै । बृहद्धानवे । ब्रह्मरूपायै । ब्रह्मस्थायै ।
बृहस्पत्यै । बालसौख्यप्रदायै । लीलायै । बाणासुरकरापहायै ।
बलिमात्रे । बृहद्धाम्न्यै । बादरायणसंस्तुतायै । भयघ्न्यै ।
भीमरूपायै । भियै । भूतस्थायै । भीमनन्दिन्यै नमः । ७००

ॐ भूत्यै नमः । भवान्यै । भयदायै । भीषणायै । भवभीषणायै ।
भूपतये । भूधरधरायै । भूतावेशनिवासिन्यै । भालनेत्रायै ।
भैरव्यै । भूतिदायै । भ्रामर्यै । भ्रम्यै । भूर्भुवःस्वः
स्वरूपायै । भीमायै । भवभयापहायै । भीमभ्राजन्मणिग्रीवायै ।
भ्रातृपूज्यायै । भार्गव्यै । भ्राजिष्णवे नमः । ७२०

ॐ भासुरायै नमः । भास्यायै । भानुकोटिसमप्रभायै । भक्तिगम्यायै ।
भ्रमघ्न्यै । भक्तकामदुहायै । भुवे । भवभीतिहरायै ।
भव्यायै । भ्रान्त्यै । भगवत्यै । मह्यै । महालक्ष्म्यै । महाकाल्यै ।
महिषासुरघातिन्यै । मत्तमातङ्गगमनायै । मधुसूदनरूपिण्यै ।
मधुप्रियायै । मधुरवाचे । मधुघ्न्यै नमः । ७४०

ॐ मथुरायै नमः । मधवे । मालतीकुसुमारामायै । मदमन्थरगामिन्यै ।
मातङ्ग्यै । मानदायै । मात्रे । मातृमण्डलवासिन्यै ।
मायायै । मान्यापुर्यै । मुख्यायै । मोक्षदायै । मीनरूपिण्यै ।
मन्दारभूधरधरायै । मन्दारस्रग्धरायै । मख्यै । मातामह्यै ।
मातृमात्रे । मध्यमायै । मानस्यै नमः । ७६०

ॐ मनवे नमः । मेनकामुदे । महेज्यायै । मोहिनीमन्त्रदेवतायै ।
मधुस्रवायै । मत्यै । मेधायै । मनीषायै । मृत्युमारिकायै ।
मृगत्वचे । मायै । मृगाक्ष्यै । मोहहन्त्र्यै । मनस्विन्यै ।
मनेप्सितप्रदायै । मात्रे । मदहृते । मदिरेक्षणायै । यमुनायै ।
यमभीतिघ्न्यै नमः । ७८०

ॐ यमलार्जुनमध्यगायै नमः । यमलोकहरायै । याम्यायै ।
योगिन्यै । यमलायै । यत्यै । यन्त्रोद्धारवत्यै । यात्रायै ।
योगनिद्रायै । यमप्रियायै । यशस्विन्यै । योगिगम्यायै । योग्यायै ।
योगिजनप्रियायै । योगाङ्गध्यानशीलायै । यज्ञभुवे । यज्ञवर्धिन्यै ।
योगपट्टधरायै । यज्ञायै । यज्ञाङ्गायै नमः । ८००

ॐ यज्ञकामदायै नमः । यज्ञरूपायै । यज्ञकर्त्र्यै ।
यत्तत्पदनिबन्धिन्यै । यशोदायै । यादव्यै । यूत्यै । युद्धज्ञायै ।
यदुवंशजायै । यादवार्तिहरायै । युक्तायै । यक्षिण्यै । यवनार्दिन्यै ।
रक्ताम्बरधरायै । रक्तायै । रक्तबीजवधोद्यतायै । रमण्यै ।
राममूर्त्यै । रागिण्यै । रक्तदन्तिकायै नमः । ८२०

ॐ रतिप्रियायै नमः । रतिकर्यै । रक्तकेश्यै । रणप्रियायै ।
रक्तकेयूरवलयायै । रतिरागविवर्धिन्यै । रोलम्बपूर्णमालायै ।
रमणीयायै । रमापत्यै । राकायै । राकेशवदनायै । रम्यायै ।
रणितनूपुरायै । रक्षोघ्न्यै । रतिदात्र्यै । रागज्ञायै ।
रागवल्लभायै । रत्नगर्भायै । रत्नरख्यै । राक्षस्यै नमः । ८४०

ॐ रजनीप्रियायै नमः । रात्र्यै । राजीवनेत्रायै । रणभूम्यै ।
रणस्थिरायै । लक्ष्म्यै । लावण्यरूपायै । ललितायै । लोललोचनायै ।
लीलावत्यै । लक्षरूपायै । लङ्कायै । लवणोदध्यै । लङ्केशहन्त्र्यै ।
लेखायै । लङ्काराज्यप्रदायै । लतायै । लीलायै । लीलानरवपुषे ।
लोलायै नमः । ८६०

ॐ लक्ष्यायै नमः । लसत्तनवे । लवणासुरसंहन्त्र्यै ।
लेख्यायै । लावण्यभुवे । लिप्यै । लक्ष्मणायै । लक्षणाढ्यायै ।
लोलार्कपरिपूजितायै । वरेण्यायै । वसुधायै । वीरायै । वरिष्ठायै ।
वरप्रदायै । वामनायै । वैदिक्यै । विद्युते । वाराह्यै । वेत्रवत्यै ।
विश्वेशायै नमः । ८८०

ॐ वीरमात्रे नमः । वीरश्रियै । वैष्णव्यै । विभवे । वेद्यै ।
वेद्यायै । वेदितायै । विष्णुमायायै । वसुन्धरायै । व्योमहन्त्र्यै ।
विश्वरूपायै । विद्यायै । वाचे । विश्ववेदितायै । वृद्ध्यै ।
वृत्त्यै । वरायै । विश्वायै । व्योमरूपायै । वषट्कृत्यै नमः । ९००

ॐ वनमालाधरायै नमः । व्याप्त्यै । विख्यातायै । विमलायै । वसवे ।
व्यालरूपायै । वैद्यविद्यायै । वासिष्ठ्यै । वीर्यदायिन्यै । वाताल्यै ।
वारूण्यै । विष्वक्सेनायै । वाचस्पत्यै । वध्वे । विरिञ्चिजनन्यै ।
वेदमात्रे । वह्निस्वरूपधृचे । वागुरायै । वधुरूपायै । वालिहन्त्र्यै नमः । ९२०

ॐ वराप्सरायै नमः । शाम्भव्यै । शम्भुजनन्यै ।
शम्बरासुरघातिन्यै । शाम्बर्यै । शमन्यै । शान्त्यै । श्रेष्ठायै ।
श्रियै । श्रीकर्यै । शम्यै । शातकुम्भमय्यै । शक्त्यै । श्यामायै ।
शीलवत्यै । शिवायै । शालग्रामशिलायै । शीतायै । श्रीनिध्यै ।
श्रीमत्यै नमः । ९४०

ॐ शुभायै नमः । शाकम्भर्यै । शुच्यै । श्रद्धायै । शोणाक्ष्यै ।
शेषवन्दितायै । शताक्ष्यै । शबलायै । शान्तायै । शस्तायै ।
शोकविनाशिन्यै । शत्रुमार्यै । शत्रुरूपायै । शरधन्वधरायै ।
श्रुत्यै । शरदिन्दुप्रभायै । शिक्षायै । शतघ्न्यै । शान्तिदायिन्यै ।
षण्मातृजनन्यै नमः । ९६०

ॐ षष्ठ्यै नमः । षष्टिहायनरूपिण्यै । षडङ्गज्ञायै ।
षड्विकाररहितायै । षोडश्यै । कलायै । सर्वज्ञायै । सर्वशक्त्यै ।

सुलभायै । सरख्ये । सख्यै । सुखदायै । सामगीत्यै । स्मृत्यै ।
सत्यायै । समायै । सत्यै । सरण्यै । सुन्दर्यै । सीतायै नमः । ९८०

ॐ सुभद्रायै नमः । सरस्वत्यै । सुश्रोण्यै । सुमुख्यै । सौम्यायै ।
सुस्पर्शायै । सुमत्यै । सुधायै । स्वच्छन्दायै । सुभगायै ।
साध्व्यै । सुतन्तवे । सुप्रभायै । समिते । सुस्पृष्टायै । सात्विक्यै ।
सार्यै । सकलागमपूजितायै । हंसायै । हैहयसंहन्त्र्यै नमः । १०००

ॐ हर्षदात्र्यै नमः । हरिप्रियायै । हविषे । हलधरायै । हन्त्र्यै ।
ह्रीम्बीजायै । हरवन्दितायै । हालाहलधरायै । होरायै । हयगायै ।
हतदानवायै । हयग्रीवतनवे । हैम्यै । हंसोज्ज्वलशिरोरुहायै ।
हुङ्कारहतदैत्याहये । हयघ्न्यै । हंसवाहनायै । हाहागीतप्रियायै ।
हावभूम्यै । हास्यप्रियायै नमः । १०२०

ॐ क्षेमङ्कर्यै नमः । क्षित्यै । क्षीरसमुद्रशयनायै । क्षमायै ।
ज्ञेयायै । ज्ञानस्वरूपायै । ज्ञानदायै । ज्ञानदीपिकायै । १०२८

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे महालसासहस्रनामावलिः समाप्ता ।

The nAmAvalI follows corresponding stotram. The names are not forcefully joined to get 1008 number although if a well edited nAmAvalI is available, it can be modified.
Please pay attention to the devotion part more than the number of names.

Proofread by PSA Easwaran

*Shri Mahalasa Sahasranamavali Stotram*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*